श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीगारुडे महापुराणे पूर्वखण्डे प्रथमांशाख्ये आचारकाण्डे

# ॥ श्रीविष्णुपञ्जरस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीविष्णुपञ्जरस्तोत्रम् ॥

हरिरुवाच

प्रवक्ष्याम्यधुना ह्येतद्वैष्णवं पञ्जरं शुभम्।
नमो नमस्ते गोविन्द चक्रं गृह्य सुदर्शनम्।
प्राच्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः॥ **1** ॥

गदां कौमोदकीं गृह्ण पद्मनाभ नमोऽस्तु ते।
याम्यां रक्षस्व मां विष्णो त्वामहं शरणं गतः॥ **2** ॥

हलमादाय सौनन्दं नमस्ते पुरुषोत्तम।
प्रतीच्यां रक्ष मां विष्णो त्वामहं शरणं गतः॥ **3** ॥

मुसलं शातनं गृह्य पुण्डरीकाक्ष रक्ष माम्।
उत्तरस्यां जगन्नाथ भवन्तं शरणं गतः॥ **4** ॥

खड्गमादाय चर्माथ अस्त्रशस्त्रादिकं हरे।
नमस्ते रक्ष रक्षोघ्न ऐशान्यां शरणं गतः॥ **5** ॥

पाञ्चजन्यं महाशङ्खमनुद्बोधञ्च पङ्कजम्।
प्रगृह्य रक्ष मां विष्णो आग्नेय्यां रक्ष सूकर॥ **6** ॥

चन्द्रसूर्यं समागृह्य खड्गं चान्द्रमसं तथा।
नैर्ऋत्यां मां च रक्षस्व दिव्यमूर्ते नृकेसरिन्॥ **7** ॥

वैजयन्तीं सम्प्रगृह्य श्रीवत्सं कण्ठभूषणम्।
वायव्यां रक्ष मां देव हयग्रीव नमोऽस्तु ते॥ **8** ॥

वैनतेयं समारुह्य त्वन्तरिक्षे जनार्दन।
माञ्च रक्षाजित सदा नमस्तेऽस्त्वपराजित॥ **9** ॥

विशालाक्षं समारुह्य रक्ष मां त्वं रसातले।
अकूपार नमस्तुभ्यं महामीन नमोऽस्तु ते॥ **10** ॥

करशीर्षाद्यङ्गुलीषु सत्य त्वं बाहुपञ्जरम्।
कृत्वा रक्षस्व मां विष्णो नमस्ते पुरुषोत्तम॥ **11** ॥

एवमुक्तं शङ्कराय वैष्णवं पञ्जरं महत्।
पुरा रक्षार्थमीशान्याः कात्यायन्या वृषध्वज॥ **12** ॥

नाशयामास सा येन चामरं महिषासुरम्।
दानवं रक्तवीजञ्च अन्यांश्च सुरकण्टकान्।
एतज्जपन्नरो भक्त्या शत्रून्विजयते सदा॥ **13** ॥

॥ इति श्रीविष्णुपञ्जरस्तोत्रं समाप्तम्॥